**लावण्य** न० लवणस्य भावः ष्यञ्। लवणत्वे "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" उज्ज्वलमत्युक्ते देहसौन्दर्य्यभेदे च।

**लासिका** स्त्री लस–ण्वुल्। नर्त्तक्याम् अमरः। पृषो० लासकीत्यप्यत्र तट्टीका।

**लास्य** न० लस–ण्यत्। १नृत्ये अमरः। २वाद्यनृत्यगीतत्रिके मेदि०। "स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते ३स्त्रीनृत्ये च। स्वार्थे क। तत्रैव।

**लिकुच** पु० लकुच–पृषो० इत्त्वम्। (माँदार) वृक्षे अमरः।

**लिक्षा(क्षा)** स्त्री लिश–गतौ क्स षढकत्वानि पृषो० वा कत्व। १यूकाण्डे शब्दर०। "जालान्तरगते भानौ यच्चाणु दृश्यते रजः। तैश्चतुर्भिर्भवेल्लिक्षा" इत्युक्ते २परिमाणभेदे च।

**लिख** लेखने तुदा०पर०सक०सेट्। लिखति अलेखीत्। कुटादिरप्ययम् तेन लिखनमिति सिद्धम्।

**लिख** गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्खति अलिङ्खीत्

**लिखन** न० कु० लिख–भावादौ ल्युट्। १लेखने २लिपौ च।

**लिखित** न० लिख–भावे क्त। १लेखने। आधारे क्त। २लिपौ अमरः। विवादे अर्थसाधके ३पत्रे च "प्रमाणं लिखितं भुक्तिः" स्मृतिः। लेख्यशब्दे दृश्यम्। ४स्मृतिकारके शङ्खमुनिभ्रातरि मुनिभेदे पु०।

**लिग** गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्गति अलिङ्गीत्।

**लिग** चित्रीकरणे चुरा०उभ०सक०सेट् इदित्। लिङ्गयति ते अलिलिङ्गत् त।

**लिङ्ग** पु० लिगि–अच्। १चिह्ने २पुंसोऽसाधारणचिह्ने उपस्थेन्द्रिये अमरः। ३अनुमानसाधने हेतौ ४सांख्योक्ते प्रधाने तस्यात्मविवेकहेतुत्वात् तथात्वम् ५शिवमूर्त्तिभेदे मेदि० ६व्याप्ये ७व्यक्ते शब्दनिष्ठे पदसाधुताप्रयोजके ८धर्मभेदे त्रिका० ९अर्थप्रकाशनसामर्थ्ये च। "समता च लिङ्गमिति" मीमांसकाः।

शब्दधर्मलिङ्गं चास्माभिः शब्दार्थरत्ने निरूपितं यथा "लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म एव तद्विशेषश्च पुंनपुंसकत्वादिः। तथा हि सर्वेषां त्रिगुणप्रकृतिकार्य्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्थमभ्यधायि। "विकृतसत्त्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्त्वस्याधिक्ये पुंस्त्वम् अल्पत्वे (रज आधिक्ये) स्त्रीत्वमिति"। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति हर्य्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थेऽवभासते" हर्य्युक्तेश्च शब्दानां नामार्थतावगतेः। तथा प्रातिपदिकार्थाभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा०सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गाद्यनन्वयापत्तेर्व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्"।

अर्थप्रकाशनसामर्थ्यरूपलिङ्गन्तु द्वितीयादिस्तवके तत्तन्मन्त्रप्रकाश्यार्थे विनियोगसाधकं यथा "बर्हिर्देवसदनं दामीति" अत्र दामीति पदस्य दाप् लवने इत्यस्माद्धातोः सिद्धस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य चास्तृतदर्भप्रकाशनसामर्थ्यात् दर्भच्छेदने समुदायमन्त्रस्य विनियोगोऽवगम्यते" तत्त्वबोध०। प्रत्यक्षा द्वितीयास्तवके तु लैङ्गिकविनियोगस्योच्यते "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" जै० सू०। यथा "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" श्रुतिः ऐन्द्री च ऋक् "कदाचन करीरसि नेन्द्र ! दाशुषे" अस्य मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यम् तदेतत् निरूपितं तत्त्वबोधन्याम् "तथा हि गार्हपत्यमिति द्वितीयारूपप्रत्यक्षश्रुत्या गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलान्वयित्वरूपं कर्मत्वं साक्षाद्बोधितं तथा च तस्य देवतात्वं श्रुतिप्राप्तं क्रियाजन्यप्रीतिभागित्वेनोद्देश्यस्यैव देवतात्वादिति गार्हपत्याग्नेरुपस्थानस्य शेषितावगम्यते ऐन्द्र्येति तृतीयया ऋचः करणत्वबोधनादुपस्थानशेषत्वमवगम्यते मन्त्रलिङ्गेनेन्द्रस्यापि शेषित्वमित्युभयोरुपस्थानं देवतात्वञ्चावगम्यते। तथा च विरोधः न ह्यन्यप्रकाशकमन्त्रेणान्योपस्थानं